## || श्री स्वामी समर्थ ||

---

# || त्रैलोक्यविजय भैरवी कवचम् |

---

देव्युवाच भैरव्याः सकला विद्याः श्रुताश्चाधिगता मया।
सांप्रातं श्रोतुमिच्छामि कवचं यत्पुरोदितम्॥
त्रैलोक्यविजयं नाम शस्त्रास्त्र विनिवारकम्।
त्वत्तः परतरो नाथ कः कृपां कर्तुमर्हति॥

ईश्वरोवाच शृणु पार्वति वक्ष्यामि सुन्दरि प्राणवल्लभे।
त्रैलोक्यविजयं नाम शस्त्रास्त्र विनिवारकम्॥
पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत्।
जघान सकलान्दैत्यान् यद्धृत्वा मधुसूदनः॥
ब्रह्मासृष्टिं वितनुते यद्धृत्वाभीष्टदायकः।
धनाधिपः कुबेरोपि वासवस्त्रिदशेश्वरः॥
यस्य प्रसादादीशोहं त्रैलोक्यविजयी विभुः।
न देयं परशिष्येभयोऽसाधकेभ्यः कदाचन।
पत्रेभ्यः किमथान्येभ्यो दद्याच्च मृत्यमाप्नुयात्।
भैरव्याः कवचस्यास्य दक्षिणामतिरेव च॥
विराट छन्दो जगद्धात्री देवता बालभैरवी।
धर्मार्थकाम मोलेष विनियोगः प्रकीर्तितः॥
अधरो बिन्दुमानाद्यः कामः शक्तिशशीयुतः।
भृगुर्मनुस्वरयुतः सर्गो बीजत्रयात्मकः॥

बालैषा मे शिरः पातु बिन्दुनादयुतापि सा।
भालं पातु कुमारीशा सर्गहीना कुमारिका॥
दृशौ पातु च वाग्बीजं कर्णयुग्मं सदावतु।
कामबीजं सदा पातु घ्राणयुग्मं परावतु॥
सरस्वतीप्रदा बाला जिह्वां पातु शुचिप्रभा।
हौं कण्ठं हसकलरी स्कन्धौ पातु हस्रौं भुजौ॥

पंचमी भैरवी पातु करौ हसैं सदावत
हृदयं हसकलीं वक्षः पातु हसौः स्तनौ मम।
। पात सा भैरवी देवी चैतन्यरूपिणी मम
हौं पातु सदा पार्श्वयुग्मं हस्कलरी सदा।
। कक्षि पातु हसौर्मध्ये भैरवी भुवि दुर्लभा।

ओंवं मध्यदेशं बीजविद्या सदावत।
हस् पृष्ठं सदा पातु नाभिं हस्कलह्रीं सदा।
पातु हसौं करौ पातु षट्कूटा भैरवी मम।
। सहस्सैं सक्थिनी पातु सहस्कलरी सदावतु।
गुह्यदेशं हनौं पातु जानुनी भैरवी मम॥
सम्पत्प्रदा सदा पातु हैं जंघे हस्क्लीं पदौ।
पातु हंसौः सर्वदेहं भैरवी सर्वदावतु॥
हसैं मां भवतु प्राच्यां हरक्लीं पावकेवतु।
हसौं मे दक्षिणे पातु भैरवी चक्रसंस्थिता॥
ह्रीं क्लीं ल्वें मां सदा पातु नैर्ऋत्यां चक्रभैरवी।
क्रीं क्रीं क्रीं पातु वायव्ये हूं हूं पातु सदोत्तरे॥
ह्रीं ह्रीं पातु सदैशान्ये दक्षिणे कालिकावतु।

ऊर्ध्वं प्रागुक्तबीजानि रक्षन्तु मामधःस्थले॥
दिग्विदिक्षु स्वाहा पातु कालिका खड्गधारिणी।
ॐ ह्रीं स्त्री हूं फट् सातारा सर्वत्र मां सदावतु॥
संग्रामे कानने दुर्गे तोये तरङ्गदुस्तरे।
खड्गकर्तृधारा सोना सदा मां परिरक्षतु॥
इति ते कथितं देवि सारात्सारतरं महत्।
त्रैलोक्यविजयं नाम कवचं परमाद्भुतम्॥
यः पठेत्प्रयतो भूत्वा पूजायाः फलमाप्नुयात्।
स्पर्धामूद्ध्य भवने लक्ष्मीर्वाणी वसेत्ततः॥
यः शत्रुभीती रणकातरो वा भीतो वने वा सलिलालये वा।
वादे सभायां प्रतिवादिनो वा प्रकोपाद् ग्रहसंकुलाद्वा।
प्रचण्ड दण्डाक्षमनाच्च भीतो,रक्षः कृच्छसाध्यात्।
गुरोः प्रकोपादपि अभ्यचर्यदेवीं स स्यान्महेश प्रतिमो प्रपठेत्रिसन्ध्यं, जयी च॥
त्रैलोक्य विजयं नाम कवचं मन्मुखोदितम्।
विलिख्य भूर्जगुटिकां स्वर्णस्थां धारयेद्यदि।
कण्ठे वा दक्षिणे बाहौ त्रैलोक्य विजयी भवेत्।
तद् गात्रं प्राप्य शस्त्राणि भवन्ति कुसुमानि च॥
लक्ष्मीः सरस्वती तस्य निवेद्भवने मुखे।
एतत्कवचमज्ञात्वा यो जपेद्भैरवीं पराम्॥
बालां वा प्रजपेद्विद्वान्दरिद्रो मृत्युमाप्नुयात्॥
॥ इति श्रीरुद्रयामले देवीश्वर संवादे त्रैलोक्य विजयं नाम्ना भैरवी कवचम्॥

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पण मस्तु||